**अपात्रीकरण** न० अपात्रं श्राद्धभोजनाद्ययोग्यं क्रियतेऽनेन । १ निन्दितप्रतिग्रहादिजनिते "निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयमसत्यस्य च भाषण"मिति मनूक्ते पापभेदे २ तद्धेतुभूते निन्दितधनादानादौ च ।

**अपाद्** त्रि० नास्ति पादोऽस्य अन्त्यलोपः समा०। १ पादशून्ये "अपाद्पाणिर्जवनोग्रहीतेति" श्रुतिः ।

**अपादान** न० अपगमाय आदीयतेऽवधित्वेन अप+आ+दा—ल्युट् । "ध्रुवमपायेऽपादानमिति" १ व्याकरणपरिभाषिकारकभेदे । यथोक्तं हरिणा "अपाये यदुदासीनं चलं वा यदि वाऽचलम् । ध्रुवमेवातदावेशात्तदपादानमुच्यते" पततोध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ । तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते । मेषान्तरक्रियापेक्षमवधित्वंपृथक् पृथक् । मेषयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक् पृथक्" इति तच्चापादानं त्रिविधम् । "निर्द्दिष्टविषयं किञ्चिदुपात्तविषयं तथा। अपेक्षितक्रियञ्चेति त्रिधापादानमिष्यते" इति हर्युक्तेः । निर्द्दिष्टः श्रूयमाणो विषयो यस्य तत्, स्वापेक्षितश्रूयमाणक्रियमित्यर्थः यथा वृक्षात् पर्णं पततीत्यादौ, अपादानविषयीभूतं पतनं हि तत्र श्रूयमाणम् । द्वितीयम् उपात्तः गृहीतः धात्वन्तरार्थवटकीभूत इति यावत् विषयो यस्येति व्युत्पत्त्या स्वविषयक्रियाघटितश्रूयमाणक्रियान्तरमित्यर्थः यथा मेघात् विद्योतते विद्युदित्यादौ निःसरणपूर्व्वकविद्योतनार्थविद्योततियोगे मेघादेस्तदेकदेशे निःसरणेऽपादानत्वम् । अपेक्षितक्रियं तृतीयं यथा कुतो भवानिति प्रश्नवाक्ये, पाटलिपुत्रादित्युत्तरवाक्ये च कुत इति पाटलिपुत्रादित्यनयोरपेक्षितगत्यादिक्रियापेक्षत्वात् अपेक्षितक्रियापादानत्वम् । "अपादाने पञ्चमीति पा० ।

**अपान** पु० अपानयति अपसारयति मूत्रादि अप+आ+नी—ड अपसारयति अधोऽनिति गच्छति वा अप+अन—अच् वा १ मूत्रादेरधो नयनशीले, गुह्यदेशस्थे, "अधोनयनत्वपानस्तु आहारश्च वृणा पुन" रित्युक्तलक्षणे "मूत्रशुक्रवहोवायुरपान इति कीर्त्त्यते" इत्युक्तलक्षणे च वायौ । "प्राणोऽपानव्यानसमान इत्येतत् सर्वं प्राण" इति छ० "अपनयनात् मूत्रपुरीषादेरपानोऽधोवृत्तिर्वायुः नाभिस्थान" इति भा० "अथ योऽस्य प्रत्यङ् शुषिः सोऽपान" इति छा०उ०। "अथ योऽस्य प्रत्यङ् शुषिः पश्चिमदिक्स्थो वायुविशेषः स मूत्रपुरीषाद्यपनयन्नधोऽनितीत्यपान" इति भा० "यद्वै प्राणिति स प्राणः यदपानिति सोऽपान इति" छा० उ० । "यद्वै पुरुषः प्राणिति मुखनासिकाभ्यां वायुं वहिर्निःसारयति स प्राणाख्यो वायुर्वायुवृत्तिविशेषः यदपानित्यपश्वसिति ताभ्यामेव मुखनासिकाभ्याम् अन्तराकर्षति वायुः सोऽपानोऽपानाख्या वृत्तिरिति"भा०। पदार्थादर्शे तु पूर्व्वोक्तैव निरुक्तिर्दर्शिता यथा अपानयत्यपानोऽयमाहारं च मलार्पितम् । "शुक्रं मूत्रं तयोत्सर्गमपानस्तेन मारुतः । इन्द्रगोपप्रभाकाशः सन्ध्याजलदसन्निभः ॥ स च मेढ्रे च पायौ च उरुवङ्क्षणजानुषु । जङ्घोदरे कृकाट्याञ्च नाभिमूले च तिष्ठती"ति योगार्णवः । "प्राणापानान्तरे देवी वाग्वै नित्यं प्रतिष्ठतीति" महा० भा० "प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणा"विति गीता। अप+अन—भावे घञ् । २अपानक्रियायाम् वहिर्गतायाः ३ प्राणवृत्तेरन्तः प्रवेशने पु० "प्रजाभ्योऽपानायेति" ता०ब्रा०। "अपानः वहिर्गतायाः प्राणवृत्तेरन्तःप्रवेशनमपाननं तेन हि वायुः शरीरे नीयते अपानेन, यतः "प्राणो न पराभवतीति" अत्यन्तरमिति" ता०भा० । आधारे घञ् ४ गुह्यस्थाने पु० ।

**अपानन** न० अप+अन-भावे ल्युट् । १ अपश्वसने, मुखनासिकाभ्यां वहिर्निःसारितप्राणवायोस्ताभ्यामेव मार्गाभ्यामन्तराकर्षणे २ मूत्रपुरीषादेरधोनयने च अपानशब्दे ता०ब्रा०उदा०

**अपान्तरतमस्** पु०अपगतमान्तरं तमो यस्य । १वेदार्थप्रकाशके देवसुतभेदे । "अपान्तरतमा नाम जातो देवस्य वै सुतः । कृतास्तेन वेदार्थास्तेन सत्येन मोक्ष्ययेति"हरिवं० २६२अ०

**अपाप** त्रि० नास्ति पापं पापकारणं वा यस्य । १ पापजनकाचारशून्ये" २ निष्पापे च "इयं दाशरथे! सीता सुव्रता ब्रह्मचारिणी । अपापा हि त्वया त्यक्तेति" रामा० ।

**अपामार्ग** पु० अपमृज्यते व्याधिरनेन मृज्—करणे घञ् कुत्वदीर्घौ। (आपाङ्) इति १ ख्याते वृक्षे ! "अपामार्ग! त्वया वयं सर्व्वं तदपमृज्महे" अथ० ४,१८,७। "अपामार्ग ओषधीनां सर्व्वासामेक इद्वशीति" अथ० ४,१७,६,७।

**अपामार्गक्षारतैल** न० "कर्णनादे कर्णक्ष्वेडे कटुतैलेन पूरणम् नादबाधिर्य्ययोः कुर्यात् कर्णशूलोक्तमौषधम् अपामार्गक्षारजलैः कृतकल्केन साधितम् तिलजमपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणत" इति चक्रदत्तोक्ते १ तैलभेदे ।

**अपामार्गतैल** न० "क्षयजे क्षयमासाद्य कर्त्तव्यो बृंहणो विधिः। पाने नस्ये च सर्पिः स्याद्वातघ्नैर्मधुरैः शुभम् । कृमिजे व्योषनक्ताह्वशिग्रुवीजैश्च नावनम् । अजामूत्रयुतं नस्यं कृमिजे कृमिजित् परम् । अपामार्गफलव्योषनिशाक्षारकरामठैः । सविडङ्गैः शृतं मूत्रे तैलं नस्यं